ARYAVART SHODH VIKASH PATRIKA
RNI TITLED NO. UPBBIL04292
RNI REG. NO. UPBBIL/2014/66218
PP. NO.- 283-285
ISSN NO.-2347-2944
Vol.-8, No.-II, Issues-IX YEAR- Dec-2017

# समीक्षणम्

**डॉ0 महेश कुमार द्विवेदी**
सहायक आचार्य
श्री एकरसानन्द आदर्श संस्कृत महाविद्यालय, मैनपुरी (उ०प्र०) भारत

***सारांश – जिजीविवा (कथासंग्रहः) कथाकारो वनमालिविश्वालः प्रकाशनम्– पद्मजाप्रकाशनं प्रयागः, प्रथमसंस्करणम्–2006 मूल्यम्–200/– रूप्यकाणि।***

संस्कृतलघुकथासंग्रहोऽयं साम्प्रतिकत्वमुपगताः मानवीयसंवेदनान्तर्भूता निगूढाकूतयः कथाः कलयति। कथाप्रवाहस्य या काचित् सरणिः पद्धतिर्वा संस्कृत उपलभ्यते सा नवीनतयात्रा प्रकाशते।

विकीर्णीभूता इतस्तत प्रकाशिता वा सर्वाः कथा संगृहीतात्रा कथाकृता। जिजीविषेति शीर्षकेण जीवनकामुकानां साधनाभावनिरताञ्जनानां कीदृशी मनोदशा कतिविधा च तास्ताः प्रवृत्तयो वा लोकमूलत्वञ्च तस्या किमिति सर्व पाठकं संमोहयति। कथामाध्यमेन स्वार्थपरायणतां भोगवादिसंस्कृतिं अधोमुखचारित्रयञ्च सर्व विश्लेषितवान् ग्रन्थकारः।

कथारचनारतानां राजेन्द्रमिश्र–राधावल्लभ–रवीन्द्र–नारायणदाश प्रभृतीनामाधुनिकानां कथासंग्रहेषु या काचित् लोकदृष्टिर्दृश्यते सैवेदानीं विश्वाललेखिन्या वर्णनकौशलपुरस्सरं सरलवर्णविन्यासेन वितन्यतेति। नवीनायां कृतावत्रा अष्टाविंशतिकथाः सुगुम्फिता लेखकेन।

प्रायशोऽन्यत्कथाकारापेक्षया वृत्तान्तस्य भाषा सरला सुललिता सुस्पष्टा च। कृतेर्नूतनायामाः, नव्या च दिक्, नवीनश्च रचनासंसारः सर्वदा नव्यकथाकारोदीयमानत्वं संभावयन्ति। कृतिरियं न केवलं कथात्मिका अपितु समाजस्य याथार्थ्यं आदर्शञ्च प्रबोधयन्ती काचित् साहित्यसर्जना। कथासारोऽपि तल्लाभाय तदन्तरग्त्वज्ञानाद्य च। दार्शनिकजीवनपद्धतिर्यथा जनसामान्यार्थं तथैव सैषा कृतिरपि तदर्थमित्यवगाहयति कथावृत्तान्तचिन्तनदिशा। निश्चयमेव आबालवृद्धतरुणानाञ्च कृते रसास्वादाय शिवसंकल्पमनोभावाय च समुपादेयेति मे मनः।

**चतुर्व्यूहम् (एकाङ्कीसंग्रहः) रचनाकारः – डॉ. कृष्णचन्द्रत्रिपाठी प्रकाशनम्–प्रेंटिस हॉल ऑफ डिण्स, नव–देहली प्रथमसंस्करणम् 2006 मूल्यम्–पञ्चाशत् रूप्यकाणि।**

नाटकेषु एकाङ्करचनानां प्राधान्यं नाट्यशास्त्राप्रवर्त्तनानन्तरं नैरन्तर्यं सुप्रथितम्। क्वचित् ऐतिहासिकं पर्यालोचनं क्वचिच्च व्यक्तिनिष्ठपरिदृश्यं सर्वमभिनीतन्नाट्यविशारदैः। समसामयिकविचारबिन्दू– नादायेदानीं लेखकवर्याणां लेखनी चौरसाक्षात्कार– सिकतासेतु–गोदोहनशीर्षकैः तत्–तद्भावान् प्रकटयन्ती लौकिकव्याप्तिमनुबोयन्ती चारितार्थ्यं कुर्वन्ती वा प्रतिभाति। लेखकस्य रचनाशैली संस्कृतस्य क्लिष्टतां परिव्यज्यन्ती तथ्यानाविष्कुर्वती रमणीयवर्णविन्यासं स्फोटयन्ती लोकहितं संवर्द्धयन्ती एकाटिनां सुष्ठुप्रयोगमुन्मीलयति।

एकाटिनां प्रथमः प्रकल्पो द्वादशदृश्यसमन्वितः अपराश्च ये प्रकल्पास्ते तावत् सप्तसंख्याकदृश्येषु समाकल्पिताः। समेऽपि दृश्यप्रसग समीचीनतयाऽभिनेयतां गताः।

रचनाकारस्य रचनाधर्मिता सर्वदा श्रव्य–दृश्योभयवाचकत्वं झटितिबोधगम्यत्वञ्च संकेतयति। संस्कृतं स्यात् सर्वजनीना भाषा नातिसरला नातिकठिना इत्येवमपि रचनाकारस्य लक्ष्यम्। स्थालीपुलाकन्यायेनाथ गोदोहनमिति प्रभेदेन लोकहितसंवर्द्धकः कश्चन संदेशो निस्सरति–यथा

**कार्यमद्यतनीनं यत् तदद्यैव विधीयताम्।**
**विपरीते गतिर्यस्य स कष्टं लभते ध्रुवम्।।**

एवमेव प्रेरणास्पदं संदेशो वरीवर्ति सर्वेषु एकाङ्किषु। संस्कृतप्रचारप्रसाराय छात्राणाञ्च कृते सर्वदोपादेया इयं कृतिः। विद्यालयीयसंस्कृतरग्मञ्चोपस्थापने संस्कृतस्यापि सहभागित्वं यथा स्यात्तदर्थं नव्याकर्षणं च अतीवश्लाघ्या रचनेति मन्ये।

**राष्ट्रगौरवम् (संस्कृतगीतिकाव्यम्) प्रणेता – डॉ. उपेन्द्र पाण्डेयः, उत्कर्षप्रकाशनम्– वी. 34/37 पी. 1 गायत्रीनगर सुकूलपुरा, वाराणसी, प्रकाशनवर्षम्– वि.सं. 2061 तदनु–2004। मूल्यम्–शतरूप्यकाणि।**

संस्कृत गीतिकाव्यसंसारे नैकाः गीतिकाराः नैकाश्च गीतकृतयः। परञ्चात्रा पाण्डेयवर्याणां साम्प्रतिकत्वेन अस्ति कश्चिदपरो विशेषः। दृष्टिरियं पारम्परिकपरिपाटीमेवाग्रेसारयति परञ्च स्वराष्ट्रं प्रति नवीनं चैतन्यमथान्याभ्यः कृतिभ्यः पृथग्भूतां कामपि विवृतिं व्यनक्ति। अजरा अमरा च संस्कृतभाषा, तया च राष्ट्रगौरवम् यथाभूतं पुराकाले तथैव पुनरुद्भवेत्। इयमेव नवीना संकल्पना समीहा च प्रशस्यते कृतौ। उदीयमानकविव्यक्तित्वे राष्ट्रगौरवसंस्थायनाय संस्कृतमेव समृद्धं नान्यम् इत्येवोद्घोषः। संस्कृतराष्ट्रस्य समुद्घोषः सर्वकारपक्षतः शीघ्रमेव स्यादित्यपि अपेक्ष्यते कविना।

भारतस्य सामाजिकं जीवनं समृद्धिभूतं यथा स्यात् तदर्थं संस्कृतसंरक्षातिरिक्तः नान्यः कश्चनोपायः – तदेवं प्रदर्शितम् आद्यगीते –

**संस्कृते भारते सद्विभुः प्रार्थ्यते, भव्यराष्ट्रस्य भालः पुनर्भासताम्।**
**पातु नित्यं नवं सुन्दरं जीवनम्, सन्ततिर्भारतीया चिरं वर्धताम्।।**

ISSN NO.-2347-2944
Vol.-8, No.-II, Issues-IX YEAR- Dec-2017

यद्यपि कविकाव्ये राष्ट्रभक्तिः, राष्ट्रचेतना, गोवंशसंवर्द्धनादिसुसम्पन्नराष्ट्रपरिकल्पना एवात्रा ज्यायसी परञ्च तेषां गीतकाव्यात्मिकाऽभिव्यक्तिः सुतरां व बलीयसी मनोहारिणी च विद्यते। छन्दोवद्धरागात्मिका पद्धतिः, सारल्यवर्णविन्यासः क्वचिच्च नव–नवार्थोत्पादिका पदस्थितिः आकर्षति।

विषयानुक्रमे शीर्षकाणां संयोजनं ग्रन्थमध्ये नैव जातमागामि संस्करणे भविष्यतीत्यहं विश्वसिमि।

उदीयमानकविपङ्क्तौ स्थानं विभूषयति कृतिरेषा।

**राधानुनयः (संगीतनाटिका) प्रणेत्री – डॉ. नलिनी शुक्ला प्रबुद्धप्रकाशनम्–रामकृष्णनगरं कानपुरम् – 208012 प्रथमं परिवर्द्धितं संस्करणम्, वर्षम् – 2004 मूल्यं – पञ्चाशतरूप्यकाणि।**

संस्कृतनाट्ये रूपकभेदोपभेदपुरस्सरं नाटकानां नाटिकानां वा स्थितिः ज्ञायते। रत्नावलीसदृशी नाटिका नेदानीमपरा काचित् रचना। पूर्ववर्तिनां शास्त्रीयसिद्धान्तप्रथितानां ग्रन्थानां युगावश्यकतया संक्षेपेणोपन्यास एव रुचिकरः नान्दी–सूत्राधार–नटी–प्रवेशकापवर्जितः। प्रणेत्री इमामभिनवां परिपाटीमेव प्राधान्येन स्वीकृतवतीति– अपूर्वः कश्चन नूतनविन्यासः। स च युगानुरूप एवेति प्रतिभाति। साम्प्रतिकोऽयं लोकः संगीतालापे रुचिशीलो दरीदृश्यते। जनवाञ्छापि एतादृशी एवाधुनिकयुववर्गस्य। कृष्णरासलीला केलिक्रीडा च वैविध्यतया रसभावप्रवाहं वात्सल्यञ्च वितनोति राधानुनये कृतौ। राधाकृष्णयोर्मध्ये संगीतपद्यमाध्यमेनैव संलापः प्रेमपरिणयश्चात्रा ज्ञायेत। राधाया उपालम्भ कृष्णस्य चानुनय एवात्राप्रतिपाद्यः। सरससुललितशैली प्राञ्जलभाषा चास्या चमत्कारित्वममभित्यनक्ति तथा च राधोपालम्भः –

**धिङ्मम प्रेम हरिर्यदि सक्तो गोपवधूरसकेलौ।**
**धैर्यमहो म्रियते नहि रोदिमि नाद्य कथं प्रिय–हेलौ,**
**प्रत्यादेशमहो मदनो हृदि साहयते धृतधीरे।।**
**विहरति माधव इष्यसमीरे।।**
**कृष्णः (नेपथ्ये) मालति! कलय विकासं न कुरु निराशं समागतं भ्रमरम्।**
**सौरभ–सरसित–लासं मधु–रस–भासं वितानयात्मधृतम्।।**

नाट्यरासप्रवाहे लेखिकया डॉ. शुक्लामहोदयया विविधरागाः उन्मेषिताः। येषां गायनं समीचीनं कर्णश्रुतिसुखनिनदञ्च। गीत–वाद्य–लयादीनामेव संगीतनाम्ना प्रसिद्धेः तदविरलता भावगम्भीरता च भक्तिरसनिर्झरिणी च कश्चनानन्दश्च प्राप्यते कृतावस्मिन्। पञ्चदृश्यसमन्वितेयं नाटिका संगीतज्ञानां संस्कृतज्ञानां जिज्ञासूनाञ्च कृते कामपि नवीनां चेतनां प्रकाशयति। अत्रा विश्वम्भरनाथद्विवेदिनः विस्तृत– समीक्षणं कृतिगतापूर्वतां विभावयति। अद्यतनलोकस्येयमेवापेक्षा।

**ऋषि–वाणी |☒I-V⎕|। (Cleaning from the Vedas)**

**Selection and Translation by S.K. Lal. published by Vidyasagar M.P.L. Sastry. Education Foundation Indological Library and Research Centre Banglore. copies available at MES Kishor Kendras Barhmi 10th main malleswaram Bangalore – 3, Rs 200/-**

डॉ. लालवर्यस्य कतिपयवैदिकशब्दानां साम्प्रतिकानां सूक्तशीर्षकाणां वा तत्तद्वैदिकसंहिताबद्धानां मन्त्राणामांग्ल–रूपान्तराणामनुवादसंवलितोऽयं ग्रन्थः वैदिकसंचयं निष्पादयति एकत्रौव वेद–ब्राह्मण–आरण्यक–उपनिषद्–सौत्राग्रन्थेषु तत्तन्मंत्रोद्धरण ससन्दर्भोपन्यासं प्रस्तौति।

सरस्वती–यज्ञ–सुमति–सत्य–गायत्री–अमृत–वागादिशब्दानाधारी–कृत्य वैदिक–संहितासु तत्तद्विश्लेषणपरिज्ञानाय च ग्रन्थोऽयं नितरां हितावहः। साम्प्रतिके महार्घतायुगे न सवेषादृते सर्वे ग्रन्थाः सुलभा इति रीत्या "ऋषि–वाणी" इति संकलनमतीव श्रेयस्करं प्रतिभाति। एकत्राावचयं युगीनावश्यकता च सिध्यति। शोधकार्यदुर्वाणानादृते मंत्रासन्दर्भदृष्ट्या महदुपयोगित्वमस्येति नात्रा संदेहः। एकाशीत्युत्तरत्रिशतसंख्याकपृष्ठैः निबद्धमिदं पुस्तकम्। अकारादिक्रमेण मंत्रासूची अपि अन्ते निहितेति विद्यार्थिनां शोधार्थिनाञ्चकृते सर्वथा सुखावहम्।

**संस्कृत साहित्य में रहीम लेखिका – नाहीद आबिदी, प्रकाशकः राष्ट्रीय संस्कृत संस्थानम् – जनकपुरी नव दिल्ली – 110 058। प्रथमसंस्करणम् – 2006 मूल्यम् – 195/– रूप्यकाणि।**

देववाणीं समाश्रित्य ख्यातिग्ताः कवयः तदनु–खयातिशीला आधुनिकाः तेषाञ्च तदुपरि–अनुसंधानसरण्यालोकोपकारित्वं, कविकृतित्त्वव्यक्तित्वञ्च प्रकाशयन्तः समीक्षकाः इति समेषां सम्मिलितसाहाय्येन गीर्वाणवाणी समेधत उत्तरोत्तरम्।

लेखिकया हिन्द्यामनूदितोऽयं ग्रन्थः सर्वथा नवीनः परम्परानुमीलितः श्रमसन्दृब्धः प्रबन्धः। तुलसीदास–सूरदास–रहीम–कबीरदासादिहिन्द्याः प्रसिद्धाः कवयः, तदन्ये च संस्कृतमुपास्य हिन्दीभाषामुररीकृत्य लब्धकीर्तयः कविवराः सन्ति। एतेषां संस्कृताष्टकदेवाराधनाविषयकरचनाभिः लोकचित्ताराधनं प्राप्यते। गगाष्टक–मदनाष्टक–खेटकौतुकादिग्रन्थाः संस्कृतमिश्रितभाषाप्रवाहेण कविवर्यस्य रहीमस्य देववाणी–विषयकंज्ञानं समधिकतरं सूचयन्ति। रूद्रकवेः खानखानाचरितं कविवरराधावल्लभस्य संस्कृतसाहित्ये इस्लामपरम्परायाः योगदानमिति ग्रन्थे पूर्व चर्चितम्।

आबिदीवर्यया शोधप्रबन्धेऽस्मिन्नस्ति कश्चिदन्यद् भावगाम्भीर्यं यत्रा सांस्कृतिकीं परम्परामाश्रिव्य काव्यदृष्टिपरकं मूल्याटनं नाट्यशास्त्रीयमूल्याटनं–महाकाव्यैस्सह भावसाम्यं–नीतिकाव्योपदेशकाव्यैः सह भावसाम्यमन्ते च रहीमकवेः कृतित्त्वविषयकव्यापकतौ– ल्यत्वमादाय सार्वभौमविश्लेषणात्मको ग्रन्थोऽवश्यमेव वाण्या सह सहगतत्वं प्रकाशयति। समग्रसंस्कृतसाहित्ये रहीमकवेर्भावसाम्यं महता श्रमेण संसाधितं लेखिकया। कवेर्दोहावल्या एकैकं हि पद्यं

ARYAVART SHODH VIKASH PATRIKA
RNI TITLED NO. UPBBIL04292
RNI REG. NO. UPBBIL/2014/66218
ISSN NO.-2347-2944
Vol.-8, No.-II, Issues-IX YEAR- Dec-2017

संस्कृतभावगाम्भीर्यमेव बोधयति। भर्तृहरेर्धनञजयादिग्रन्थाधारितकाव्यनाट्यादिभावानुसरण्या रहीमकवेः भावसाम्यमपूर्वमिदं कार्यम्। संस्कृतसाहित्ये रहीमकवेर्योगदानमिति विवेचनागवेषणामूलकोल्लेखनमत्रा संस्कृतज्ञानां नवीनचिन्तनोपरि ध्यानमाकलयति पुस्तकमिदम्। सामान्यजनबोधविषयिणी भाषापद्धतिरवश्यमेव शोधार्थिनां ज्ञानं संवर्द्धयिष्यति।

*****